# Sitaramavimshati or Namah Shatakam

# સીતારામવિંશતિ અથવા નમઃશતકમ્

## Document Information

Text title : Sitaramavimshati or Namah Shatakam

File name : sItArAmaviMshatinamaHshatakam.itx

Category : raama, rAmAnanda, viMshati, sItA, devii

Location : doc_raama

Author : Haryanandacharya

Proofread by : Parashara Ranganathan

Latest update : January 28, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 29, 2024

*sanskritdocuments.org*

# સીતારામવિંશતિ અથવા નમઃશતકમ્

સીતાં શ્રિયઃ શ્રિયં રામં બ્રહ્મ નત્ત્વા ગુરું તથા ।
શ્રીસીતારામયોઃ કુર્વે વિંશતિં સુખદાયિનીમ્ ॥

વેદૈર્વેદ્યૌ ચ વન્દ્યૌ ચ સીતારામૌ પરેશ્વરૌ ।
નમસ્તાભ્યાં નમસ્તાભ્યાં નમસ્તાભ્યાં નમો નમઃ ॥ ૧॥

દિવ્યવૈભવસમ્પન્નૌ સીતારામૌ પરાત્પરૌ ।
નમસ્તાભ્યાં નમસ્તાભ્યાં નમસ્તાભ્યાં નમો નમઃ ॥ ૨॥

ક્લેશહીનો જગદ્ધેતૂ સીતારામૌ કલેશ્વરૌ ।
નમસ્તાભ્યાં નમસ્તાભ્યાં નમસ્તાભ્યાં નમો નમઃ ॥ ૩॥

દિવ્યદેહાવદોષૌ ચ સીતારામૌ ગુણામ્બુધી ।
નમસ્તાભ્યાં નમસ્તાભ્યાં નમસ્તાભ્યાં નમો નમઃ ॥ ૪॥

અગતીનાં ગતી રમ્યૌ સીતારામૌ મહેશ્વરૌ ।
નમસ્તાભ્યાં નમસ્તાભ્યાં નમસ્તાભ્યાં નમો નમઃ ॥ ૫॥

સુબન્ધૂ બન્ધુહીનાનાં સીતારામૌ દયોદધી ।
નમસ્તાભ્યાં નમસ્તાભ્યાં નમસ્તાભ્યાં નમો નમઃ ॥ ૬॥

સર્વાધારૌ નિરાધારૌ સીતારામૌ મહાબલૌ ।
નમસ્તાભ્યાં નમસ્તાભ્યાં નમસ્તાભ્યાં નમો નમઃ ॥ ૭॥

સકૃત્પાદપ્રપત્યૈવ સીતારામાવભીતિદૌ ।
નમસ્તાભ્યાં નમસ્તાભ્યાં નમસ્તાભ્યાં નમો નમઃ ॥ ૮॥

અશરણ્યશરણ્યૌ ચ સીતારામૌ કૃપાર્ણવૌ ।
નમસ્તાભ્યાં નમસ્તાભ્યાં નમસ્તાભ્યાં નમો નમઃ ॥ ૯॥

યોગિનાં ચ મહાધ્યેયૌ સીતારામૌ સુમુક્તિદૌ ।
નમસ્તાભ્યાં નમસ્તાભ્યાં નમસ્તાભ્યાં નમો નમઃ ॥ ૧૦॥

વિભૂત્યોશ્ચ દ્વયોરીશૌ સીતારામૌ મહૌજસૌ ।
નમસ્તાભ્યાં નમસ્તાભ્યાં નમસ્તાભ્યાં નમો નમઃ ॥ ૧૧॥

વિભૂતિદ્વયધર્ત્તારૌ સીતારામૌ હિ સ્વાંશતઃ ।
નમસ્તાભ્યાં નમસ્તાભ્યાં નમસ્તાભ્યાં નમો નમઃ ॥ ૧૨॥

કૃતજ્ઞૌ ચાકૃતઘ્નૌ હિ સીતારામૌ વિવેકિનૌ ।
નમસ્તાભ્યાં નમસ્તાભ્યાં નમસ્તાભ્યાં નમો નમઃ ॥ ૧૩॥

આપ્તકામૌ પરાત્માનૌ સીતારામૌ સુશક્તિદૌ ।
નમસ્તાભ્યાં નમસ્તાભ્યાં નમસ્તાભ્યાં નમો નમઃ ॥ ૧૪॥

શ્રીસમ્પ્રદાયમૂલૌ ચ સીતારામૌ જગદ્ગુરૂ ।
નમસ્તાભ્યાં નમસ્તાભ્યાં નમસ્તાભ્યાં નમો નમઃ ॥ ૧૫॥

શ્રિતાનાં દુઃખહર્ત્તારૌ સીતારામૌ સુખપ્રદૌ ।
નમસ્તાભ્યાં નમસ્તાભ્યાં નમસ્તાભ્યાં નમો નમઃ ॥ ૧૬॥

શ્રિતાઘં નૈવ વીક્ષેતે સીતારામૌ સુવત્સલૌ ।
નમસ્તાભ્યાં નમસ્તાભ્યાં નમસ્તાભ્યાં નમો નમઃ ॥ ૧૭॥

પરસ્પરમભિન્નૌ ચ સીતારામૌ રસાત્મકૌ ।
નમસ્તાભ્યાં નમસ્તાભ્યાં નમસ્તાભ્યાં નમો નમઃ ॥ ૧૮॥

સચ્ચિદાનન્દરૂપૌ ચ સીતારામૌ સુસુન્દરૌ ।
નમસ્તાભ્યાં નમસ્તાભ્યાં નમસ્તાભ્યાં નમો નમઃ ॥ ૧૯॥

સર્વદૌ સકલારાધ્યૌ સીતારામૌ ચ સર્વગૌ ।
નમસ્તાભ્યાં નમસ્તાભ્યાં નમસ્તાભ્યાં નમો નમઃ ॥ ૨૦॥

શ્રીશ્રિયાનન્દશિષ્યેણ હર્યાનન્દેન નિર્મિતા ।
પાઠાત્ કલ્યાણકૃદ્ ભૂયાચ્છ્રીસીતારામવિંશતિઃ ॥

ઇતિ પ્રતિપક્ષિભયઙ્કર જગદ્ગુરુ શ્રીહર્યાનન્દાચાર્ય
સિદ્ધશિરોમણિ નિર્મિતા શ્રીસીતારામવિંશતિ (નમઃશતકમ્) સમ્પૂર્ણમ્ ।
(સ્વશતાબ્દી મેં જગદ્ગુરુ શ્રીહર્યાનન્દાચાર્ય દ્વારા પઠિત સ્તોત્રપ્રબન્ધ)

Proofread by Parashara Ranganathan

*Sitaramavimshati or Namah Shatakam*

pdf was typeset on January 29, 2024

Please send corrections to *sanskrit@cheerful.com*